Gyanshauryam, International Scientific Refereed Research Journal
Available online at : www.gisrrj.com
© 2024 GISRRJ | Volume 7 | Issue 3 | ISSN : 2582-0095
doi : https://doi.org/10.32628/GISRRJ

# संस्कृतभाषाधिगमे सामाजिक-मनोवैज्ञानिककारकाणां प्रभावः

Dr. Hrushikesh Dalai
Associate Professor, Department of Education, KKSU, Ramtek, India

**Article Info**

**Article History**
Accepted : 20 May 2024
Published : 30 May 2024
**Publication Issue :**
Volume 7, Issue 3
May-June-2024
**Page Number :** 47-51

**शोधसार:** – भाषाधिगमे वक्ता, श्रोता, भाषा च त्रयः घटकाः सन्ति। वक्ता तस्यां भाषायां स्वरुपं प्रयोगे च निपुणः भवति। भाषयैव मानवः नित्यनूतनं च ज्ञानं दातुं वोधयितुं ग्रहीतुं च शक्नोति। अतः सभ्यतायाः विकासे भाषायाः महत् स्थानं दरीदृश्यते। यदि श्रोता भाषया: अपरिचिता तर्हि तस्य शब्दार्थवोधो झटिति न भवति। शिशुः शनैः शनैः मातुः वर्णपरिचयं पदपरिचयं च लभते अनन्तरं वाक्यपरिचयं च प्राप्नोति। पुनः कालान्तरे क्रमेण भाषाधिगमों भवति।

**विशेषशब्दाः** – शारीरिकमानसिकञ्च स्वास्थ्यम्, संस्कृतभाषा, अधिगमः, भाषाधिगमः, संस्कृतभाषाधिगमः, बुद्धिः, रुचिः, वैयक्तिकभिन्नतायाः ज्ञानम्।

**उपोद्घातः** – विरञ्चितप्रपञ्चेऽयं पारम्पारिकाधुनिकजीवनपद्धतिभ्यां प्रतिक्षणं परिवर्तनम् आयाति। कुत्रचित् मानवाः पारम्परिकसम्प्रदायम् अनुसृत्य व्यवहरन्ति, कुत्रचित् ते परिवर्तनशीलेऽस्मिन् संसारे आधुनिकपद्धतिमनुसृत्य जीवनं साधयन्ति, किन्तु एते मानवाः प्रतिदिनं परिवर्तनेऽस्मिन् प्रपञ्चे दुःखसहमानाः सुखमेवाभीप्सन्ति। यावज्जीवं सुखं व्याप्तुकामाः मानवाः सर्वेऽस्मिन् तत्तत् कार्येनिमग्ना दरीदृश्यन्ते। सुखभोगादिषु निमग्नः सर्वलोकः स्वकामनानुगुणं फलप्राप्तौ आत्मप्रगतयै यत्नशीलोपायान् विचिन्तयति। तादृशः लोकः स्वमनोरथपरिपूरकं साधनानि आविष्करोति।

**का नाम भाषा-** प्राचीनकालादेव मानवाः स्वभावनायाः परिप्रकाशार्थं बहून् प्रयासान् अकरोत्। बालात् आराध्यः वृद्ध यावत् सर्वेषां मनसि भावना विद्यते। प्रतिमुहुर्ते भावनायाः सृष्टिः जायते। मनसि जायमाना भावनानां प्रकटीकरणाय परस्परभावविनिमयाय च या माध्यमा लब्धा सा भवति भाषा।

भाषाशब्दो 'भाष व्यक्तायां वाचि' इत्यस्माद्धातोः गुरोश्च हलः' इति 'अ' प्रत्यये 'स्त्रियां टापि निष्पद्यते। भाष्यते व्यक्तवाग् इति भाषा। आङ्गलोभाषायां भाषा शब्द Language इति कथ्यते। Language इति पदं लैटिनभाषायाः Lingua इति पदात् निष्पन्नम्। भाषा सञ्चारस्य समुचितं साधनम्।

भाषया एव विचाराणामभिव्यक्तिः सम्भवति। भाषा परस्परविचाराणामाविष्कारार्यमेकं साधनं भवति। भाषा एका सामाजिका प्रक्रिया अस्ति। अतः बालकस्य व्यक्तित्वविकासै भाषायाः भूमिका प्रधानभूता अस्ति। भाषाणां बहवः प्रकाराः सन्ति। यथा– शाब्दिकभाषा, अशाब्दिकभाषा, साङ्केतिकभाषा, कुटभाषा, व्यक्तवाग्भाषा, अव्यक्तवाग्भाषेति।

**संस्कृतभाषा-** किं नाम संस्कृतम् ? इति जिज्ञासायां पदशः अस्यार्थः विव्रियते यत् समित्युपसर्गपूर्वकात्, कृधातोः करणार्थकात् संस्क्रियते इत्यर्थे क्त प्रत्यये "सम्परिभ्यां करोती भूषणे" इति सूत्रेण सुडागमे विभक्तिकार्ये संस्कृतशब्दः निष्पद्यते। या परिष्कृता, परिशुद्धा, दोषपरिमार्जिता, व्यकरणादिनियमावद्धा परिपूर्णालङ्कारभूता च भवति। सा संस्कृतभाषेत्यर्थः। या विश्वस्य प्राचीनतमा,

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

सुमधुरा, सुललिता, विपुलसाहित्योपेता गौरवशालिनी प्राचीनैः ऋषिभिः मुनिभिश्व भाषागतदोषपरिष्कारेण अपशब्दादिदोषवारणेन परिष्कृता परिपक्वा भाषा देवभाषा, देववाणी, सुरभारती इत्यादिभिर्नामधेयैः व्यवह्रियते। इयं भाषा भारतीयानां प्राणरूपिणी आचारविचारप्रवर्तिनी च वरीवर्ति। निखिलमपि वैदिकवाङ्मयं, रामायणं, महाभारतं, पुराणानि, स्मृतिग्रन्था, दर्शनानि, धर्मग्रन्था:, काव्यानि, महाकाव्यानि, नाटकानि, गद्यकाव्यानि, नीतिग्रन्थादयश्च संस्कृतभाषायामेवोपलभ्यन्ते । संस्कृतं खलु भारतस्य भारती।

**अधिगमः -** जीवने आरम्भामृत्युपर्यन्तं विशिष्टं भवति अधिगमः। अधिगमस्य अस्तित्वं जीवनस्य सर्वेषु क्षेत्रेषु प्राप्यते। संस्कृतशिक्षा वाङ्मये अधिगमशब्दः Learning इत्यस्मिन् अर्थ व्यवह्रयते। सुशिक्षणेन प्रशिक्षणेन वा जीवस्याधिगमः सञ्जायते। अधिगमः सर्वजीवसाधारणः धर्मः। अतः समाजे सर्वस्मिन् क्षेत्रे प्राप्तुं शक्यते। अधिगमप्रक्रियामाध्यमेन व्यवहारे परिवर्तनं परिमार्जनं वा जायते। जीवस्य अधिगमः सुशिक्षणेन प्रशिक्षणेन वा जायते। अधिगमः सम्यक् जायते तत् शिक्षणं सफलं मन्यन्ते। अधिगमो नाम अनुभवेन व्यवहारेण जायमानं परिवर्तनम्। मानवजीवनं प्रतिपदम् अधिगमेन प्रभावितं भवति। वातावरणेन सह समायोजनं कर्तुं यद् व्यवहारे परिवर्तनं परमार्जनं च क्रियते। तद् अधिगमः इति कथ्यते। एवम्प्रकारेण मानवजीवने अधिगमस्य स्थानं महत्त्वपूर्णं प्रतिभाति।

**भाषाधिगमः**–लोकेऽस्मिन् अगणनीयभाषाः विलसन्ति। केषाञ्चनापि भाषाणामधिगम एकवारमेवासम्भवः एव। तर्हि भाषायाः अधिगमः कथं भवति ? इत्युक्ते सर्वप्रथमं शिशुः मातृ सकाशात् भाषामधिगच्छति। शिशुः जन्मसमये निस्सहायः भवति। स्वावश्यकतानां पूर्तये सः सर्वदा मातरम् आश्रयति। माता स्वभाषां शिशुं वोधयति। अतः तां भाषां मातृभाषा कथयति। एवं भाषाशिक्षणे मातृवत् समर्थः दक्षः प्रभावशाली अध्यापकः न कोऽपि भवितुं शक्नोति। कालान्तरेण ज्ञानेन्द्रियेषु चेतनाशक्तिः प्रबलं भूत्वा विविधाः प्रतिक्रियाः करोति, येन वातावरणे सामञ्जस्य सम्पादयति।

**संस्कृतभाषाधिगमः**– प्राचीनकाले संस्कृतभाषायाः अध्ययनाध्यापनञ्च पारम्पारिकपद्धत्या एव प्रचलति। परन्तु आधुनिककाले संस्कृताध्ययने रुच्युत्पादनार्थं विभिन्नाधुनिकपद्धतीनाम् उपयोगः आवश्यको भवति। तदैव भाषाशिक्षणम् आकर्षकं प्रभावपूर्णञ्च भवितुमर्हति। संस्कृतभाषया भारतीयानां मुकुटायमानासंस्कृतिं ज्ञातुं शक्यते। विपुलवाङ्मयविस्तारे भाषानिर्माणसौन्दर्यं अतिसूक्ष्मभावनां स्पष्टीकरणे संस्कृतं विना ना कोऽपि अन्या भाषा समर्था भवितुमर्हति। न केवलं भारतस्य समग्र विश्वस्य तत्त्वं संस्कृतभाषायां निबद्धमस्ति।

**"वेदोऽखिलो धर्ममूलम्"** इत्यभियुक्तवचोनुसारं सकलधर्माणां निदानं भवति वेदः। वेदों नाम ज्ञानराशिः, अयं वेदः संस्कृतभाषायां निगदिता। रामायणमहाभारतादिकाव्यादारभ्यः संस्कृतसामान्यग्रन्थं पर्यन्तं ये ये ग्रन्थाः सन्ति, ते सर्वे लौकिकविभागे अन्तर्भवन्ति। साम्प्रतिककाले दैनन्दिनजीवने विद्यालयेषु, महाविद्यालयेषु विश्वविद्यालयेषु च लौकिकसंस्कृतभाषा प्रधानं स्थानं लभ्यते।

**भाषाधिगमे सामाजिक-मनोवैज्ञानिककारकाणां प्रभावः-**

- **शारीरिकमानसिकञ्च स्वास्थ्यम्-** छात्रस्य शारीरिक–मानसिकस्वास्थ्यम् अधिगमम् अत्यन्तं प्रभावयति। शारीरिकदृष्ट्या मानसिकतया च दुर्बलाः छात्राः विद्यालयस्य स्वकार्यक्रमेषु भागग्रहणे असमर्थाः भवन्ति, यः बालकः रुग्णो भवति तस्य पठने लेखने च रुचिर्नभवति। अतः स्वस्थच्छात्रणामपेक्षया एते पृष्ठतः भवन्ति। यदि बालकः शारीरिककष्टमनुभूयते तर्हि स्वस्य कार्ये सम्यक्तया ध्यानं दातुं न शक्यते। अध्यापकस्य कर्तव्यमस्ति यत् बोधनावसरे छात्राणां शारीरिक मानसिकञ्च स्वास्थ्यं मनसि निधत्य पाठ्येत्। शिक्षार्थीनामनुसारेण शिक्षणविधेः प्रयोगः कुर्यात्।
- **अधिगमेच्छाः-** अधिगमः छात्राणाम् इच्छानुसारेण भवति। यदि बालकः किमपि अधिगन्तुं न वाञ्छति तर्हि तेन साकं वलात् कार्यं सम्पादयितुं न शक्यते। वालकः किमपि नूतनविषये ज्ञातुम् इच्छाशक्तिः भवेत्। अतः अभिभावकाः शिक्षकाश्च बालकेषु इच्छाशक्ति वर्धयितु प्रयासं कुर्युः।

- **परिपक्वता-** अधिगमः परिपक्वता च अनयोः घनिष्ठसम्बन्धः वर्तते। बालकानां शारीरिक–मानसिकपरिपक्वता अधिगमप्रक्रियायां विशिष्टो भवति। तद् हेतोः प्रारम्भिककक्ष्यासु बालकस्य आधार मांसपेशीनां पक्वतायाः कृते प्रशिक्षणं दीयते। उच्चकक्ष्यासु बालकानां बुद्धि. योग्यता, क्षमतां च विचार्य पाठ्यक्रमं निर्मायते। अतः विद्वद्भिः विविधेषु स्तरेषु विविधं पाठ्यक्रम निर्मियते। परिपक्वता विविधावस्थास्वैव प्राप्तं शक्नोति। अतः अधिगमक्रियायै मानसिक– शारिरीकपरिपक्वता सफलता प्रददाति।
- **अभिप्रेरणायास्तरः** – अधिगमप्रक्रियायाः अभिप्रेरणस्य च महत्त्वपूर्णं स्थानं वर्तते। यदि बालकस्य कार्यं प्रति प्रेरणा न मिलति तर्हि सः कार्ये रुचिः न प्रदर्शयति । अभिप्रेरणस्य प्रभावो न्यूनमेव अधिगमे न भवति। अध्यापकः विषयस्य अध्यापनात् पूर्वं तस्य विषये प्रेरणा यच्छेत्। प्रेरणामाध्यमेन छात्रेषु मनसि महात्त्वाकाङ्क्षा उत्पद्यते। प्रेरणायाः अभावे अधिगमः असम्भवो वर्तते।
- **अधिगमविधयः**– अधिगमस्य सफलता अधिगमविधयः उपरि निर्भरा भवति। प्रत्येकछात्रः एकेन विधिनैव प्रभावितो न भवति प्रारम्भिककक्ष्यासु क्रीडाविधिना शिक्षणकार्यं प्रभावपूर्णं भवति। उच्चकक्षासु दृश्यश्रव्यमाध्यमेन शिक्षणमुत्तमं भवति।
- **बुद्धिः**– अधिगमे साफल्यं वहुलांशे बालकानां बौद्धिकयोग्यतायां निर्भरो भवति। बुद्धिमन्तः छात्राः शीघ्रमधिगच्छन्ति। परन्तु मन्दमतयस्तु मन्दाधिगन्तारः एव भवन्ति। ते अधीतं विषयम् अचिरमेव विस्मरन्ति।
- **रुचिः –** रुचिकरविषयाणामधिगमो अधिकम् अवलोक्यते। बालकस्य येषु विषयेषु रुचिः अस्ति तेषामधिगमे प्रगतिः परिलक्ष्यते। रुचिर्नास्ति चेत् अधिगमं प्रभावविलोक्यते। अधिगमः रुचेः प्रभावे दुष्करं भवति । साम्प्रतिककालेऽपि शिक्षायाः वालानां रुचेः अवधानं दीयते।
- **अधिगमकर्तुः मूलभूतक्षमता-**प्रत्येकवालकस्य अन्तर्निहितशक्तिः तथा मूलभूतक्षमता च भिन्ना वर्तते। बालकाः स्वस्थक्षमतानुसारेण विषयममधिगच्छन्ति। येषां क्षमता अधिका तेषां विषयस्य अधिग्रहणक्षमताऽचि अधिका भवति। अधिगमप्रक्रिया अधिगमकर्तुः मूलभूतक्षमतायाः उपरि निर्भरशीला भवति।
- **अध्यापकस्य भूमिका-** अधिगमप्रक्रिया अध्यापकेन सरलीक्रियते। यावत्कालपर्यन्तं अध्यापका महत्त्वपूर्णाभूमिकां न निर्वहन्ति तावत्कालपर्यन्तं अधिगमप्रक्रिया प्रभावशालीरीत्या कार्य कर्तुं न शक्यते। योग्याध्यापकाः छात्राणामभिरुचिः सम्मतां क्रियां सम्पादयति पुनःसाकल्य अदि अर्जयति। अध्यापकः शिक्षायाः नवीनान् विधीन् प्रयोगं करोति तदैव तस्य प्रभावो उत्तमो भविष्यति।
- **विषयस्य ज्ञानम्-** अध्यापकः स्वस्य विषयस्य पूर्णं ज्ञानं भवेत् चेत् छात्राणां प्रभावितं कर्तुं शक्यते। छात्राणामाधिगमप्रक्रियामपि सरलीकर्तुं शक्यते। अज्ञानी अध्यापकाः छात्राणां मानसिकविकासे सहायाता कर्तुं न शक्यन्ते।
- **समयसारण्याः निर्माणम्-** विद्यालये समयसारण्याः निर्माणसमये अध्यापकाः अधिकं ध्यानं प्रयच्छन्ति। समयसारणी अपि अधिगमक्रियां सहायता करोति। विद्यालये काठिन्यविषयस्य अध्ययनम् आदौ भवेत्। तस्मिन् समये बालकाः शारीरिक–मानसिकरुपेण अधिगमे सिद्धाः स्युः। कठिनविषयस्य कक्ष्या पुनः पुनः न भवेत्। विद्यालयस्य अन्तिमसमये सरलविषयस्य अध्ययनं भवेत्।
- **वैयक्तिकभिन्नतायाः ज्ञानम्-**प्रत्येकबालाकानां विकासस्य गतिः भिन्नतया भवति। प्रत्येकबालकः विशिष्टं वर्तते। अतः समानवयस्कयोः द्वयोः बालकयोः शारीरिक–सामाजिक–मानसिक–नैतिकविकासादिषु महत् अन्तरं भवति। अध्यापकाः बालकानां वैयक्तिकभिन्नतां ज्ञात्वा तेषां पाठयेत्। बालकानाम् अभिरुचिः, योग्यता, क्षमतानुसारेण अध्यापकं पाठ्यते चेत् अधिगमक्रियां साफल्यं भवेत्।
- **शिक्षणविधिः-** अधिगमप्रक्रियायाः शिक्षणविधिना सह प्रत्यक्षसम्बन्धं स्यात्। छात्राणां स्तरानुसारम् अभिरुच्यानुसारं च योग्यशिक्षणविधीनां चयनं कर्तव्यं, येन छात्राः स्ववैयक्तिकभिन्नताम् आश्रित्य अधिगमं प्राप्नुयुः। प्राथमिकविद्यालयच्छात्रेभ्यः

क्रीडापद्धतिः, प्रत्यक्षपद्धतिः च अनुकूलाः भवन्ति। माध्यमिक विद्यालयच्छात्रेभ्यः व्याख्यानं, प्रयोगात्मकविधिः च अनुकूलाः भवन्ति। पुनः उच्चमाध्यमिक विद्यालयच्छात्रेभ्यः पूर्वोक्तविधिना साकम् अनुसन्धानपद्धतिः अपि योग्याः भवन्ति ।

- **बालकेन्द्रितशिक्षा-** साम्प्रतिककाले बालकेन्द्रितशिक्षायाः उपरि अधिक महत्त्वं प्रदीयन्ते । छात्राणां रुच्यानुसारं शिक्षाप्रदानं कुर्वन्ति अध्यापकाः । वालानां रुच्यानुसारं शिक्षा प्रदीयन्ते चेत् तेषाम् अधिगमः सरलतया भवति। वर्तमानकाले बालकेन्द्रितशिक्षा बालकानां सार्वाङ्गीणविकासस्य उपरि वलं प्रददाति।
- **पाठ्यसहगामी क्रिया -** अधिगमक्रियायां पाठ्यसहगामीक्रिया सहायता करोति। शिक्षया छात्राणां सर्वाङ्गीणविकासः अभिप्रियते। पाठ्यसहगामीक्रियामाध्यमेन छात्राणां शारीरिकः मानसिकः वौद्धिक नैतिकविकासश्च भवति। एतस्य कृते विविधानां क्रियाणामायोजनं विद्यालयेषु विधीयते। यदा बालकस्य सर्वाः क्रियाः सक्रियाः भवन्ति, तदैव ताः विकसिताः अपि जायन्ते। परिणामतः छात्राः अधिगमे शक्ताः भवन्ति।
- **पाठ्यविषयस्य स्वरुपम्-** कस्यापि पाठ्यविषयस्याधिगमस्य साफल्यं तस्य पाठ्यविषयस्य स्वरुपेऽपि निर्भरं भवति। एतदर्थं शिक्षामनोविज्ञाने पाठ्यक्रमनिर्माणस्य सिद्धान्ताः प्रतिपादिताः। बालकस्य सम्बधानि ज्ञात्वा योग्यपाठ्यक्रमस्य निर्माण कर्तुं शक्यते।
- **रुचिकरविषयवस्तु-** रुचिकरविषयाणाम् अधिगमोऽरुचिकरविषयाणामपेक्षया सहजं भवति। निरर्थकविषयाणाम् अधिगमात् सार्थकादिविषयाणाम् अधिगमः सरलं भवति। शिक्षकः शिक्षणकाले विषयं मूर्तं रुचिकरं च विधातुं यतते।
- **विद्यालयस्य भौतिकवातावरणम्-** मानवजीवनस्य सर्वासु अवस्थासु वातावरणस्य महत्त्वपूर्णभूमिका वर्तते। विद्यालये विद्यमानवातावरणं बालकस्य अधिगमप्रक्रियां प्रभावयति। यत्राधिगमः सम्पाद्यते तत्र किदृशं बातावरणं वर्तते ? इति एतेनापि अधिगमः प्रभावितो जायते। अतः विद्यालये कक्षाप्रकष्ठ प्रयोगशाला  अध्ययनप्रकोष्ठः इत्यादिषु उत्तमप्रकाशस्य व्यवस्था भवेत्। अवधानेन दीर्घकालम् अध्येतुं शक्नुवन्ति।
- **अभ्यासः -** अभ्यासः अधिगमस्य आवश्यकोऽङ्ग वर्तते। यदा अधिगमाय अभ्यासकार्यं प्रदीयते तदा अधिगमाप्रक्रिया उन्नता भवति। अभ्यासो केवलं विषयाधिगमाय न प्रस्तूयते। क्रियात्मकानां कौशालानां प्राप्तये अपि महत्त्वपूर्ण भवति। मनोवैज्ञानिकाः अभ्यासमधिगमस्य नियमेषु परिगणितवन्तः।
- **विश्रान्तिः-** मनोवैज्ञानिकाः निश्चीयन्ते यदाधिगमकाले मध्ये विश्रान्तिः लाभाप्रदा भवति। यदा मानवाः श्रान्तो भवति तदा अधिगमप्रक्रियायाम् अवरोधः उत्पद्यते। विश्रान्त्याः अभावे अधिगमें काठिन्यमुत्पद्यते। कठिनानां सुदीर्घाणाञ्च विषयाणामधिगमाय विश्रान्तिः अतीव आवश्यका भवति।
- **शिक्षणाधिगमकार्याणां व्यवस्थापनम्-** विद्यालये कक्ष्याप्रकोष्ठेषु शिक्षणाधिगमकार्याणां योजना, व्यवस्थापनञ्च शिक्षणाधिगम प्रभावयति। यथा–
  1. नूतनज्ञानस्य पूर्वज्ञानेन सह सम्बन्धकल्पनम् ।
  2. उत्तमशिक्षणपद्धतिनां चयनं प्रयोगश्च।
  3. योग्यदृश्यश्रव्योपकरणानां चयनं प्रयोगश्च।
  4. पठनं, गृहकार्यम् इत्यादिभिः वारंवारम् अभ्यासाय अवसर प्रदानम्।
  5. प्रतिपुष्टः पुनर्बलनस्य च व्यवस्था।
  6. छात्राध्यापकयोः मध्ये विद्यमानसम्बन्धः।

**निष्कर्षः** - एवं रीत्या भाषाधिगमे वक्ता, श्रोता, भाषा च त्रयः घटकाः सन्ति। वक्ता तस्यां भाषायां स्वरुप प्रयोगे च निपुणः भवति। भाषयैव मानवः नित्यनूतनं च ज्ञानं दातुं वोधयितुं ग्रहीतुं च शक्नोति। अतः सभ्यतायाः विकासे भाषायाः महत् स्थानं दरीदृश्यते। यदि श्रोता भाषयां अपरिचित तर्हि तस्य शब्दार्थवोधो झटिति न भवति। शिशुः शनैः शनैः मातुः वर्णपरिचयं पदपरिचयं च लभते अनन्तरं वाक्यपरिचयं च प्राप्नोति। पुनः कालान्तरे क्रमेण भाषाधिगमों भवति।

**संस्कृतग्रन्थाः-**

1. संस्कृतशिक्षणाम्, मित्तल सन्तोषः, जयपुरम्, विनोदपुस्तकमन्दिरम्, संस्करणम् 2006
2. संस्कृताध्यापनम, चक्रवर्ती कानालनल, तिरुपतिः श्रीवेङ्कटाम्बपब्लिकेशन, संस्करणम्- 1996.
3. संस्कृतशिक्षणसमस्या, शर्मा वि. मुरलीधरः, तिरुपतिः, राष्ट्रियसंस्कृतविद्यापीठम्, संस्करणम्: 2003
4. भाषाविज्ञान, तिवारी भोलानाथ, इलाहवाद, किताबमहल एण्ड सन्स, संस्करणम्- 2003
5. संस्कृतवर्णानां स्वरूपं समुत्पत्तिश्च, शर्मा एल् शतपथी, वाराणसी, चौखम्बा प्रतिष्ठान, संस्करणम् 1990.
6. संस्कृतनिबन्धशतकम्, द्विवेदी कपिलदेव, वाराणसी, विश्वविद्यालयप्रकाशनम्, संस्करणम्- 2007.

**आङ्ग्लोग्रन्थाः-**

7. Educational Research, Agarwal J.C, New Delhi, Arya Book Depot. 1996
8. Teaching of Sanskrit in Secondary Schools, Apte D.G, New Delhi, Arya Book Depot, 1960
9. Research in Education, Best J.W, Engle wood cliffs 1948